# Shridharaya Namo Namah

# શ્રીધરાય નમો નમઃ

## Document Information

Text title : Shridharaya Namo Namah 1

File name : shrIdharAyanamonamaH1.itx

Category : deities_misc, gurudev, shrIdharasvAmI

Location : doc_deities_misc

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીધરાય નમો નમઃ

॥ શ્રીરામ પ્રસન્ન ॥

દત્તાત્રેયપ્રસાદાય ચિઞ્ચોળીગ્રામજન્મને ।
પતકીવંશસૂર્યાય શ્રીધરાય નમો નમઃ ॥ ૧॥

કમલાનન્દકન્દાય નારાયણપ્રિયાયચ ।
શૈશવેડપિપ્રબુદ્ધાય શ્રીધરાય નમો નમઃ ॥ ૨॥

કમલાકાન્તનીલાય મન્દસ્મિતમુખાય ચ ।
સુધાસિઞ્ચનનેત્રાય શ્રીધરાય નમો નમઃ ॥ ૩॥

શ્રીસમર્થસ્વરૂપાય સીતારામપ્રિયાય ચ ।
સજ્જનાદ્રિનિવાસાય શ્રીધરાય નમો નમઃ ॥ ૪॥

ભક્તિજ્ઞાનસમૃદ્ધાય દાસબોધસ્વરૂપિણે ।
પરબ્રહ્માદ્વિતીયાય શ્રીધરાય નમો નમઃ ॥ ૫॥

વિવેકપદ્મનાભાય વૈરાગ્યજલશાયિને ।
ભક્તિરત્નનવામ્ભોધિ શ્રીધરાય નમો નમઃ ॥ ૬॥

ભક્તસઙ્કટનાશાય ભક્તસન્તોષકારિણે ।
શ્રવણાનન્દશબ્દાય શ્રીધરાય નમો નમઃ ॥ ૭॥

શરણ્યાય વરેણ્યાય કેવલાનન્દરૂપિણે ।
શાન્તાય ભારતાધાર શ્રીધરાય નમો નમઃ ॥ ૮॥

શ્રીમત્ પરમહંસાય કાષાયામ્બરધારિણે ।
પરિવ્રાજકશૌણ્ડાય શ્રીધરાય નમો નમઃ ॥ ૯॥

ભક્તહૃદ્પદ્મભૃઙ્ગાય ભક્તવાત્સલ્યમૂર્તયે ।
ભક્તાર્તિતમહન્ત્રે ચ શ્રીધરાય નમો નમઃ ॥ ૧૦॥

પૂર્ણ વૈરાગ્યદીપ્તાય બ્રહ્મરૂપતપસ્વિને ।

નિજાનન્દસુધાસિન્ધુ શ્રીધરાય નમો નમઃ ॥ ૧૧॥

સદ્ભક્તહૃદયાકારપૂર્ણચન્દ્રાય ભાસ્વતે ।
સદ્બોધામૃતદાત્રે ચ શ્રીધરાય નમો નમઃ ॥ ૧૨॥

ગોદ્વિજાધારધીરાય વિશ્વકલ્યાણહેતવે ।
સદ્ધર્મમેરુકૂર્માય શ્રીધરાય નમો નમઃ ॥ ૧૩॥

સ્ફૂર્તિશક્તિવસન્તાય દેશધર્મામૃતાય ચ ।
અજ્ઞાનતિમિરાર્કાય શ્રીધરાય નમો નમઃ ॥ ૧૪॥

સત્તત્વરત્નગર્ભાય શાન્તિદાત્રેસુધાંશવે ।
સન્તપ્તહૃદ્સુધાવૃષ્ટિ શ્રીધરાય નમો નમઃ ॥ ૧૫॥

ષટ્શત્રુગજસિંહાય દુષ્ટાહઙ્કારદારિણે ।
રજસ્તમનિહન્ત્રે ચ શ્રીધરાય નમો નમઃ ॥ ૧૬॥

જીવબન્ધવિમોક્ષાય શિવજીવૈક્યકારિણે ।
સત્યાય સત્યબોધાય શ્રીધરાય નમો નમઃ ॥ ૧૭॥

નમઃ શિવાય ગુરવે નિરાલમ્બાય તેજસે ।
નિષ્પ્રપઞ્ચાય દિવ્યાય શ્રીધરાય નમો નમઃ ॥ ૧૮॥

અનન્તબલવીર્યાય મોક્ષાનન્દપ્રદાયિને ।
ગુરુસેવાતિનિપુણ શ્રીધરાય નમો નમઃ ॥ ૧૯॥

વિદ્વત્સન્તસભાધ્યક્ષસંસ્તુતાય મહાત્મને ।
ભૂમ્ને વિનયશીલાય શ્રીધરાય નમો નમઃ ॥ ૨૦॥

નારાયણકૃપામાલાધારિણે પરમાત્મને ।
દયાક્ષમાસમુદ્રાય શ્રીધરાય નમો નમઃ ॥ ૨૧॥

શ્રી સમર્થકૃપાપ્રાપ્ત યોગદણ્ડધરાય ચ ।
ધર્મોદ્ધારાર્થસન્નદ્ધ શ્રીધરાય નમો નમઃ ॥ ૨૨॥

આર્યાવર્તવિપત્કાલચિન્તાતપ્તાય હિન્દવે ।
મહત્કૃચ્છ્રતપઃશીલ શ્રીધરાય નમો નમઃ ॥ ૨૩॥

અનન્તતીર્થરૂપાય ભક્તાઘનગનાશિને ।
વિશ્વમાતા મહાદાની શ્રીધરાય નમો નમઃ ॥ ૨૪॥

જયતુ જયતુ દિવ્યો વત્સલઃ શ્રીધરોઽયં
    નિજજનપરિતાપં યઃ કરોતિ પ્રશાન્તમ્ ।
સ્વજનમન નિવાસો યો મહા મૌનધારી
    તપતિ ચિર સુતીવ્ર ભૂતયે ભારતસ્ય ॥ ૨૫॥

બદ્ધભાવે લક્ષ્મણેન શ્લોકૈરેતૈઃસ્તુતો ગુરુઃ ।
ભગવાન્ શ્રીધરઃ પાતુ પાઠકાન્ ભવબન્ધનાત્ ॥ ૨૬॥

॥ પ. પ. ભ. શ્રીધરચરણાર્પણમસ્તુ ॥

ઇતિ શ્રીધરાય નમો નમઃ સ્તુતિઃ સમાપ્તા ।
(ડૉ. લ. શં. ભાવે, પુણે
શ્રીધરસન્દેશઃ આષાઢ ૧૮૮૯)

Proofread by Paresh Panditrao

*Shridharaya Namo Namah*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*